ब्राह्मी देवता यस्याः । गगनमध्ये उदिते सति सिंहलग्नस्य अष्टचत्वारिंशत्पलाधिकदण्डत्रितयं गतं भवति । यथा,—

"कम्बुकण्ठि ! प्रफुल्लालसौ नभो-
मध्यमागतवति प्रजापतौ ।
पञ्चभिः गजकुम्भलिप्तिका
निःसृताः सुमुखि ! सिंहलग्नतः ॥"

इति कालिदासकृतरात्रिलग्ननिरूपणम् ॥ * ॥

तत्र जातफलं यथा,—

"स्वधर्म्मकार्य्ये कुशलः कुलीनः
सुचारुदेहो विलसत्कलेवरः ।
दाराग्निनाकुलिताखिलाशयो
यो रोहिणीजः स धनी स मानी ॥"

इति कोष्ठीप्रदीपः ॥ * ॥

गलरोगविशेषः । यथा । रोहिणीनामकगलरोगाणां नामानि संख्याचाह ।

"रोहिणी पञ्चधा प्रोक्ता कण्ठशालूक एव च ।
अधिजिह्वश्च वलयोऽलासनामैकवृन्दकः ॥
ततो वृन्दः शतघ्नी च गिलायुः कण्ठविद्रधिः ।
गलौघः स्वरघ्नश्च मांसतालस्तथैव च ।
विदारी कण्ठदेशे तु रोगा अष्टादश स्मृताः ॥"

तत्र पञ्चानामपि रोहिणीनां सामान्यसंप्राप्तिमाह ।

"गलेऽनिलः पित्तकफौ च मूर्च्छितौ
प्रदूष्य मांसञ्च तथैव शोणितम् ।
गलोपसंरोधकरैस्तथाङ्कुरै-
र्निहन्त्यसून् व्याधिरियं हि रोहिणी ॥"

अनिलः मूर्च्छितः प्रवृद्धः कफपित्तौ च मूर्च्छितौ पित्तं वा मूर्च्छितं कफो वा मूर्च्छितः । ननु त्रयोऽपि मूर्च्छिताः पृथग्दोषजाया अविवक्षमाणत्वात् । तस्या वातजाया लक्षणमाह ।

"जिह्वासमन्तादृभृशवेदनास्तु
मांसाङ्कुराः कण्ठविरोधनाः स्युः ।
सा रोहिणी वातकृता प्रदिष्टा
वातात्मकोपद्रवगाढयुक्ता ॥"

जिह्वासमन्तात् जिह्वायाः सर्व्वतः । वातात्मकोपद्रवगाढयुक्ता स्तम्भादिभिरतिशयेन युक्ता ॥"

पित्तजामाह ।

"क्षिप्रोद्गमा क्षिप्रविदाहपाका
तीव्रज्वरा पित्तनिमित्तजाता ॥"

श्लेष्मजामाह ।

"स्रोतोनिरोधिन्यपि मन्दपाका
गुर्व्वी स्थिरा सा कफसम्भवा तु ॥"

स्रोतोऽत्र कण्ठस्रोतः ॥ * ॥ सन्निपातजामाह ।

"गम्भीरपाकिन्यनिवार्य्यवीर्य्या
त्रिदोषलिङ्गा त्रिभवा भवेत् सा ॥"

रक्तजामाह ।

"स्फोटैश्चिता पित्तसमानलिङ्गा
साध्या प्रदिष्टा रुधिरात्मिका तु ॥"

रक्तजेतरासंहारकत्वावधिमाह ।

"सद्यस्त्रिदोषजा हन्ति त्र्यहात् कफसमुद्भवा ।
पञ्चाहात् पित्तसम्भूता सप्ताहात् पवनोत्थिता ॥"

कण्ठशालूकमाह ।

"कोलास्थिमात्रः कफसम्भवो यो
ग्रन्थिर्गले कण्टकशूकभूतः ।
खरः स्थिरः शस्त्रनिपातसाध्य-
स्तं कण्ठशालूकमिति ब्रुवन्ति ॥"

कण्टकशूकभूतः कण्टकवच्छूकवद्वेदनाजनकः ॥

अधिजिह्वामाह ।

"जिह्वाग्ररूपः श्वयथुः कफात्तु
जिह्वोपरिष्टादसृजैव मिश्रात् ।
ज्ञेयोऽधिजिह्वः खलु रोग एष
विवर्ज्जयेदागतपाकमेनम् ॥"

असृजा मिश्रादेवेत्यन्वयः ॥ * ॥ वलयमाह ।

"बलास एवायतमुन्नतञ्च
शोथं करोत्यन्नगतिं निवार्य्य ।
तं सर्व्वथैवाप्रतिवार्य्यवीर्य्यं
विवर्ज्जनीयं वलयं वदन्ति ॥"

अलासमाह ।

"गले तु शोथं कुरुतः प्रवृद्धौ
श्लेष्मानिलौ श्वासरुजोपपन्नम् ।
मर्म्मच्छिदं दुस्तरमेनमाहु-
रलाससंज्ञं भिषजो विकारम् ॥"

मर्म्मच्छिदं हृदयमर्म्मणि छेदेनेव वेदनाजनकम् ॥

एकवृन्दमाह ।

"वृत्तोन्नतोऽन्तः श्वयथुः सदाहः
सकण्डुरोऽपाक्यमृदुर्गुरुश्च ।
नाम्नैकवृन्दः परिकीर्त्तितोऽसौ
व्याधिर्ब्बलासक्षतजप्रसूतः ॥"

अन्तः गलमध्ये । अपाकी ईषत् पाकी । अमृदुः ईषन्मृदुः ॥ * ॥ वृन्दमाह ।

"समुन्नतं वृत्तममन्ददाहं
तीव्रज्वरं वृन्दमुदाहरन्ति ।
तञ्चापि पित्तक्षतजप्रकोपा-
द्विद्यात् सतोदं पवनात्मकन्तु ॥" * ॥

शतघ्नीमाह ।

"वर्त्तिर्घना कण्ठनिरोधिनी तु
चितातिमात्रं पिशितप्ररोहैः ।
अनेकरुक् प्राणहरी त्रिदोषा
ज्ञेया शतघ्नीसदृशी शतघ्नी ॥"

घना कठिना । अनेकरुक् वातपित्तकफजतोददाहकण्ड्वादियुक्ता । शतघ्नीसदृशी लोहकण्टकसंछन्ना शतघ्नी महती शिला । तत्तुल्या यतः प्राणहरी ॥ * ॥ गिलायुमाह ।

"ग्रन्थिर्गले त्वामलकास्थिमात्रः
स्थिरोऽल्परुक् स्यात् कफरक्तमूर्त्तिः ।
संलक्ष्यते सक्तमिवाशितञ्च
स शस्त्रसाध्यस्तु गिलायुसंज्ञः ॥"

गलविद्रधिमाह ।

"सर्व्वं गलं व्याप्य समुत्थितो यः
शोफो रुजः सन्ति च यत्र सर्व्वाः ।
स सर्व्वदोषैर्गलविद्रधिस्तु
तस्यैव तुल्यः खलु सर्व्वजस्य ॥" * ॥

गलौघमाह ।

"शोथो महान् यस्तु गलावरोधी
तीव्रज्वरो वायुगतेर्निहन्ता ।
कफेन जातो रुधिरान्वितेन
गले गलौघः परिकीर्त्तितोऽसौ ॥"

वायुगतेर्निहन्ता उदानवायुगतिरोधकः ॥ * ॥

स्वरघ्नमाह ।

"यस्ताम्यमानः श्वसिति प्रसक्तं
भिन्नस्वरः शुष्कविमुक्तकण्ठः ।
कफोपदिग्धेष्वनिलायनेषु
ज्ञेयः स रोगः श्वसनात् स्वरघ्नः ॥"

ताम्यमानः तमः पश्यन् । शुष्कविमुक्तकण्ठः शुष्को विमुक्तोऽस्वाधीनः कण्ठो यस्य सः । अस्वाधीनता भुक्तं गिलितुं अशक्यत्वात् । अनिलायनेषु वायुवर्त्मसु । श्वसनाद्वातात् ॥ * ॥

मांसतानमाह ।

"प्रतानवान् यः श्वयथुः सुकष्टो
गलोपरोधं कुरुते क्रमेण ।
स मांसतानः कथितोऽवलम्बी
प्राणप्रणुत् सर्व्वकृतो विकारः ॥"

प्रतानवान् विस्तारवान् । सुकष्टः अतिशयितं कष्टं यत्र सः ॥ * ॥ विदारीमाह ।

"सदाहतोदं श्वयथुं सुताम्र-
मन्तर्गले पूतिविशीर्णमांसम् ।
पित्तेन विद्याद्वदने विदारीं
पार्श्वे विशेषात् स तु येन शेते ॥"

पार्श्वे विशेषात् स तु येन शेते स पुरुषो येन पार्श्वेन विशेषाद्बाहुल्येन शेते तस्मिन् पार्श्वे सा विदारी भवतीत्यर्थः ॥ * ॥ अथ गलरोगाणां चिकित्सा ।

"रोहिणीनान्तु साध्यानां हितं शोणितमोक्षणम् ।
वमनं धूमपानञ्च गण्डूषो नस्यकर्म्म च ॥
वातजान्तु हृते रक्ते लवणैः प्रतिसारयेत् ।
सुखोष्णान् स्नेहगण्डूषान् धारयेच्चाप्यभीक्ष्णशः ॥
विस्राव्य पित्तसंभूतां सिताक्षौद्रप्रियङ्गुभिः ।
घर्षयेत् कवलो द्राक्षापरूषैः कथितो हितः ॥
आगारधूमकटुकैः कफजां प्रतिसारयेत् ।

आगारधूमः झूल इति लोके । कटुकानि शुण्ठीपिप्पलीमरिचानि ।

"श्वेताविडङ्गदन्तीषु तैलं सिद्धं ससैन्धवम् ।
नस्यकर्म्मणि दातव्यं कवलञ्च कफोच्छ्रये ॥"

श्वेता अपराजिता ।

"पित्तवत् साधयेद्वैद्यो रोहिणीं रक्तसम्भवाम् ।
विस्राव्य कण्ठशालूकं साधयेत्तुण्डिकेरिवत् ॥
एककालं यवान्नञ्च भुञ्जीत स्निग्धमल्पशः ।
उपजिह्विकवच्चापि साधयेदधिजिह्वकम् ॥
एकवृन्दन्तु विस्राव्य विधिं शोधनमाचरेत् ।
एकवृन्दमिव प्रायो वृन्दञ्च समुपाचरेत् ॥
गिलायुश्चापि यो व्याधिस्तञ्च शस्त्रेण साधयेत् ।
अमर्म्मस्थं सुसंपक्वं छेदयेद्गलविद्रधिम् ॥"

इति भावप्रकाशः ॥

( स्थूले, त्रि । यथा, महाभारते ।२।६१।३३।